This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीमंगलमूर्तिर्जयति॥

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1908
Dist. Nagpur

Acc. No. ~~3083~~ M-1908

Title - चरणव्यूह टीका.

टी. :- चरणव्यूह विवृत्ति.

Author - महीदास (= महीधर संवत् 1663)

Date - शके 1734.

Sub - वेदलक्षण.

folio - 24.

Xerox - 47 Scribe - विठ्ठलभट्ट कुरंडे.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥ॐ॥अथातश्चरणव्यूहौव्याख्यास्यामस्तत्रहुंचातुर्वेद्यंचत्वारोवेदाश्चि
ज्ञानामवंतिऋग्वेदायजुर्वेदःसामवेदोथर्ववेदश्चेतितत्रऋग्वेदाष्टभेदाभवंतिचर्चाश्च
वकश्चर्चकश्चवनीयपारःक्रमपदःक्रमजटाःक्रमदंडश्चेतिचतुष्पारायणमेतेषांशा
खाःपंचविधाभवंत्याश्वलायनीसंख्यायनीशांकृत्याबाष्कलमांडूकाश्चेतितेषामध्याय
नमध्यायाश्चतुःषष्टिर्मंडलानिशैवतु॥वर्गाणांपरिसंख्यातंहेसहस्रेषडुत्तरे॥सहस्र
मेकंसूक्तानांत्रिर्भवेत्केनकल्पितं॥ऋचांसप्तसुपठ्यंतेसंख्यातंवैपदक्रमे॥एकंशत
सहस्रंतुत्रिपंचाशत्सहस्राईमेताःनिचतुर्दशाश्वासिष्ठानामितरेषांपंचाशीतिःम
कालेषुवेष्टयं॥चतुस्त्रिंशत्सहस्राणिद्विखंडाःसहस्राणांद्वात्रिंशत्सोक्तेशानत्रयोत्यारिं
ज्ञातसहस्राणिद्वात्रिंशतेचोक्तेरसहस्राणिद्वात्रिंशतेसहस्राणि॥ऋचांदशसहस्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथातश्चरणव्यूहंव्याख्यास्यामः॥अथशब्दोमंगलेप्रस्तावेवा॥अथशब्दःसर्वमेवमंगलार्थइत्यर्थः॥अतः
हेत्वर्थः॥चरणव्यूहः॥वेदराशिश्चतुर्विभागात्चरणेोच्यते॥तस्यव्यूहोसमुदायः॥चतुर्वेदानांसमुदायो
व्याख्यास्यामइत्यर्थः॥कथमेकवेदः॥तदुक्तंआरण्यके॥सर्वेवेदाःसर्वेयोषाएकैवव्याहृतिःप्राण
एवप्राणऋचइत्यधिकादितैतस्यचतुर्विभागाःकृताःतथाचोक्तंभागवतेगीतेनोसौच
तुरोवेदांश्चतुर्भिर्वदनैःप्रभुः॥सव्याहृतिकान्सांकारान्श्चतुर्होत्रविवक्षया॥एत्रान्यथा
मयंस्तांतु ब्रह्मर्षेब्रह्मकोविदान्॥तेतुधर्मोपदेष्टारःसर्वेत्रैभ्यःसमाहृताः॥तेपरंपर
याप्राप्तास्तद्विद्येश्चधृतव्रतैः॥चतुर्युगेष्वथव्यस्तादापरादौमहर्षिभिः॥क्षीणायुःक्षीणस
त्त्वश्चदुर्मेधान्वीक्ष्यकालतः॥वेदाब्रह्मर्षयोव्यस्तादृष्ट्वास्वाच्युतनोदिताः॥अस्मिंनप्यत
ब्रह्मन्भगवान्लोकभावनः॥ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तयेपराशरात्सत्य
वत्यामंशांशकलयाविभुः॥अवतीर्णोमहाभागवेदंचक्रेचतुर्विधं॥ऋग्यजुःसाम्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राशीरङ्ग्यवार्शिः॥ चतस्रसंहिता श्चैकसूत्रे मणिगणाइव॥ मंत्रैर्मणिगणाइवेति पाठांतरं॥ तासांस
चतुरः शिष्यान्बभाषेयमहामतिः॥ एकैकसंहितां प्रह्वेनैकैकस्मैददौविभुः॥ पैलायसंहितां माध
वह्रृचाख्यामुवाचह॥ वैशंपायनसंज्ञायनिगदाख्यंयजुर्गणं॥ सामाख्यंजैमिनयेप्राह तथा छंदोगा
संहितां॥ अथवंगिरसीनामस्वशिष्यायसुमंतवेदहत्॥॥ पैलःस्वसंहितामूचेइंद्रप्रमितयेमुनिः॥
बाष्कलायैसताप्याहशिष्येभ्यःसंहितास्वकाः॥ चतुर्थायस्ववोध्याययाज्ञवल्क्यायभार्गवि॥ पराशरायगि
प्रमितेरिंद्रप्रमितिरात्मवान्॥ अध्यापयत्स्वसंहितामांडूकेयमृषिंकवि॥ तच्छिष्योदेवमित्रश्चसौ
भर्यादित्यमुचिवान्॥ इंद्रप्रमितिसुतोमांडूकेयः॥ मांडूकेयसुतःशाकल्यः॥ शाकल्यशिष्योदेवमित्रः॥
शाकल्यस्तत्सुतःस्वांतुपंचधाव्यसंहितां॥ बाल्यमुद्गलशालीयगोखल्यशिशिरैधातृ॥ जातूकर्ण्य
श्चतच्छिष्यःस्वनिरुक्तां स्वसंहितां॥ बालायपैंग्यलौहाक्षिरुजेभ्योदंडीमुनिः॥ बाष्कलिःप्रतिशा
खेभ्योबालखिल्याख्यसंहितां॥ चत्वेबालायनिर्मथ्यकाशीरश्चैवतांदधुः॥ बह्रृचासंहितोद्यतास्

च

स्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैर्ब्रह्मर्षिभिर्दृष्टा:॥ श्रुत्वैवं चेदसंन्यासं सर्वपापैः प्रमुच्यते॥ इति श्रीमन्महाभागवते द्वादशस्कंधे षष्ठोध्यायः॥ अस्यार्थः॥ व्यासशैलः संहिताः पदक्रमं चक्रिरे धरूपेण इत्याद्युक्तमितयेदृशे॥ इदमिति॥ श्रुत्वार्धजरतं व्यासं दृष्ट्वा बालं तथाग्निमित्रौ षड्शिष्येभ्यः स्वसुतं मांडुकेयं च ददौ॥ शाकल्यः संहिताः पदक्रमजटादेरूपं चपंचधा व्यासं दृष्ट्वा वात्स्यमुद्गलशालीयगोखल्यशिशिरेभ्यो ददौ इति॥ परेषु संहितत्वं इति ऋग्वेदे नवोदात्तानुदात्तः स्वरितस्वराणां संधिः॥ एतच्छंदसां वा संविस्तारं श्रुत्वा सर्वपापैः प्रमुच्यत इत्यर्थः॥ तथा च विष्णुपुराणे॥ ब्रह्मणा नोदितो व्यासो वेदान्व्यस्तुमचक्रमे॥ अथर्शिष्यान्समाजग्राह चतुरो वेदपारगान्॥ ऋग्वेदश्रावकं पैलं समाजग्राह महामतिः॥ वैशंपायननामानं यजुर्वेदस्य चाग्रहीत्॥ जैमिनीसामवेदं तथैवाथर्ववेदवित्॥ सुमंतस्तस्यशिष्याभूद्वेदव्यासस्यधीमतः॥ तथा चरह्यसूत्रे॥ सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतधर्माचार्या इति॥ जानंतीति बाह्वीसार भ्यमांडुकेयारुंतमांडूकगणाः समुदाय॥ गर्गश्वाचक्रवीसारभ्यशांस्वायनमित्रेयशांखायनगणाः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतेषां कौषीतकीसूत्रं ब्राह्मणआर्ण्यकं च॥ऐतरेयंरित्यारभ्यआश्वलायनोताः॥आश्वलायनगणाः॥एषांऐ
तरेयआरण्यकंब्राह्मणं॥आश्वलायनसूत्रंइत्यर्थः॥तत्रयदुक्तंचातुर्वेद्यंचत्वारोवेदाविज्ञाताभवंति॥अ
स्मिन्ग्रंथेयदुक्तं चातुर्वेद्यंतत्रचत्वारोवेदा विज्ञाताभवंति॥ऋग्वेदोयजुर्वेदः॥सामवेदोथर्ववेदश्चेति॥इ
तिस्पष्टार्थः॥वेदाहियज्ञार्थमभिप्रवृत्ताः॥तेयज्ञाः द्विविधाः॥अग्नौहूयमानाअनग्नौप्रहुताः॥अग्नौ
हूयमानावैतानिकाः॥अनग्नौप्रहुतानित्याभ्यासोब्रह्मयज्ञःपारायणंचे॥अत्रसूत्रसूत्रं॥ब्रह्मयज्ञस्वं
डु॥यद्वेधीतेपथआहुतिभिरेवतद्देवतास्तर्पयतियद्ब्राह्मणेष्टताहुतिभिर्यत्सामानिमथ्याहुतिभि
र्यदथर्वांगिरसः सोमाहुतिभिर्ब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपुराणानीत्यस्मताहुतिभिर्यद
वेधीतेऽस्यपितॄंउपक्षरंतिरितिः॥तत्रऋग्वेदाष्टभेदाभवंति॥स्थानानिभवंतीतिपाठांतरंशा
कलवाष्कलौऐतरेयब्राह्मणारण्यकौ॥शारवायनभांडुकैकौषीतकीयब्राह्मणारण्यकावितिः॥अष्टमे
दाः॥अन्यवेदाविकृतिः शारवाश्वभेदस्तुत्रिविधस्तथा॥पृथक्नामाभिधानेनव्यासेनकथितंपुरा

स्वधा

पयसःकुल्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विति॥अत्राष्टभेदेनाष्टौस्थानेनवाविकृतिग्राह्या॥विकृतिस्तुअग्रेवक्ष्यामः॥तस्माद्ब्रह्मयज्ञार्थेपारायणेच
ऋग्वेदस्याध्ययनंकर्तव्यं॥ततश्चतुष्पदेनवृक्ष्यति॥चर्चा॰श्रावकश्चर्चकश्रवणीयपारइति॥चर्चा
ध्ययनं॥तत्रश्रोणसूत्रे॥चिंतिपूजिकथिकुंविचर्चश्च॥एभ्योऽङ्स्त्रियांभावादौ॥चिंतिस्मरणं॥पू
जिरर्जायां॥कथितवाक्यप्रबंधे॥कुंविआक्षारणे॥चर्चाध्ययने॥चुरादयइति॥अष्टाध्यायसूत्रे॥ता
त्वोष्टपुट्यापारेणशब्दस्यश्रवणंक्रियतेसाचर्चा॥तद्ध्ययनस्यश्रावकोगुरुः॥तस्यचर्चकःशिष्यः॥
श्रवणीयपारः॥श्रवणीयेवेदेतस्यपारःसमाप्तिः॥इतिचतुष्पदेनअध्ययनंसूचितं॥अग्रेचतुष्पदे
नचत्वारिंशत्पारायणेसूचयतिं॥तत्पारायणंद्विविधं॥प्रकृतिविकृतिरूपं॥काप्रकृतिः॥काविकृतिः॥
प्रकृतिःसंहिता॥साद्विविधा॥रूढायोगा॥रूढायथा॥अग्निमीळेपुरोहितमिति॥योगायथा॥अग्नि
मीळे॥ईळेपुरोहितमितिप्रातःशाखियद्वितीयपटलेभाष्यकरणेव्याख्यातं॥अथचतुष्पारायणंय ४
था॥क्रमपारः॥क्रमपदः॥क्रमजटः॥क्रमदंडश्चेति॥चतुष्पारायणं॥क्रमशब्देनभयसंहितोवाच्यः॥स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं ॥ अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमं ॥ विलोमे पदवत्संधिरनुलोमे यथाक्रमं ॥ यथाक्रमं यथा
संहितारत्यर्थः ॥ अन्यच्च ॥ वर्णक्रमः ॥ अक्षरसमाम्नाय एवेत्यारण्यके ॥ कथमभिष्टुयादित्यक्षरशः ॥ प
दशः ॥ अर्धर्चशः ॥ ऋक्शः ॥ इति ब्राह्मणे ॥ भर्यांसितुसमाम्नाघ्रेजनमाजेनुतत्स्याभिधानस्यभव
तिनैरुक्तैः ॥ क्रमः संहिता वाचिकथं ॥ पदप्रकृतिः संहिता इतिनैरुक्तवचनात् ॥ सा क्रमरूपा इत्यर्थः ॥ क्रम
पदः क्रमः संहितातस्याः पदानि ॥ इतिहि प्रकृतिपाठायणे ॥ द्वे विकृतिरूपे ॥ विकृतिस्तु अष्टधा भवंति ॥ त
द्यथा ॥ जटामालेरेखाध्वजोदंडोरथोघनः ॥ अष्टौविकृतयः प्रोक्ताः क्रमपूर्वमहर्षिभिः इति ॥ आसां मध्ये
जटादेर्द्वयोः प्राधान्यं ॥ तत्कथं ॥ जटानुसारिणीशिखा ॥ दंडानुसारिण्याः मालालेरेखाध्वजोरथस्य ॥ घन
स्तुभयोरेखानुसारित्वात् ॥ अस्याः नियमवाक्यानि च्यालीकृतजटापटलउदाहरणानिच ॥ तत्रजटा वा
क्यं ॥ क्रमे यथोक्तपदजातमेवद्विरभ्यसेदुत्तरमेवपूर्वं ॥ अभ्यस्यपूर्वं चतथोत्तरंपदेवसेमिवंद्विर्जटाभि
धीयते ॥ १ ॥ अस्यार्थः ॥ क्रमे यथोक्तसंतिक्रमोहाभ्यांइतिअलं ॥ तुक्तैः क्रमप्रकारैरपदजातंपदद्वयंवा

शिखा
लेरि

न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदत्रयंवाद्विवारमभ्यसेत्॥द्विवारंपठेत्॥अभ्यासप्रकारः॥उत्तरमेवपूर्वं॥क्रमवत्पदद्वयंगृहीत्वापूर्वं
नामप्रथमंउत्तरपदमभ्यसेत्॥ततःउत्तरपूर्वपदयोःसंधानद्वारापूर्वं,द्वितीयस्योत्तरपदेअवसानएवंप्र
कारेणअध्ययनंजटाअभिधीयतेकथ्यतेइतिनिश्चयपार्थेनउदाहरणेनदृश्यते॥अग्निमीळइळेअग्नि
मग्निमीळे॥ईळेपुरोहितंपुरोहितमीळईळेपुरोहितं॥इत्यादितेये॥अथदंडलक्षणं॥क्रममुत्क्रमविपर्यस्य
पुनश्चक्रममुत्तरं॥अर्धर्चादिवमुक्तोक्तःक्रमउदंडमभिधीयते॥२१॥उदाहरणं॥अग्निमीळे॥ईळे
अग्निं॥अग्निमीळे॥ईळेपुरोहितं॥पुरोहितमीळेअग्निमित्यादितेये॥अथमालालक्षणं॥ध्रुवाक्रमवि
पर्यासावर्धर्चस्यादितांततः॥अंतेचादिर्नयेद्यंक्रममालेतिगीयते॥मालामालेवपुष्पाणांपदानां
संहितीहिता॥आवर्तयेत्त्रयस्तस्याक्रमव्युत्क्रमसंक्रमः॥२॥अथशिखालक्षणं॥पदोत्तरोजटामेव
शिखामार्याःप्रचक्ष्यते॥अथलेखालक्षणं॥क्रमद्वित्रिचतुःपंचक्रममुदाहरेत्॥दृष्टकूटघनविपर्यस्य
लेखामाहुःपुनःक्रमात्॥अथध्वजलक्षणं॥ध्रुवादेःक्रमंसम्यग्गत्वादुत्थापयेद्यदि॥वर्गेचक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चि वा यत्र पतनं सध्वजः स्मृतः॥ ६ अथ रथलक्षणं॥ पादोर्ध्वं चक्रयोर्वापि महोत्या दंडवद्भवेत्॥ ७॥ अथ घनलक्षणं॥ जटामुकुटविपर्यस्तघनमाहुर्मनीषिणः॥ ८॥ अन्यच्च॥ जटाभिश्चिरवाद्यनः प्रोक्ताः क्रमपदैर्मनीषिणः॥ ९॥ इति विकृतिलक्षणान्युक्तानि॥ अध्ययने॥ संहितापारायणं॥ पदपारायणं जटापारायणं॥ क्रमदंडपारायणं च॥ चतुष्पारायणमित्यर्थः॥ एतेषां मध्ये॥ ऋग्वेदः पंचभवंति॥ एतेषां वेदव्यासपारायणं नाम पंचम्॥ एवं भवंतीत्यर्थः॥ ताः का॥ आश्वलायनीसांख्यायनीशाकलबाष्कलमांडूकाश्चेति॥ इति प्रसिद्धाः॥ तेषामध्ययनं॥ तेषां आश्वलायनीयादिऋग्वेदांसमाम्नाय अध्ययनेस्वचयति॥ अध्यायैश्चतुःषष्टिः॥ अग्निमीळेऽग्रंदेवतायाअयंवेत्यादि॥ ६७॥ चतुःषष्टिरध्याया इत्यर्थः॥ मंडलानि दशैववतु॥ अग्निमीळेकुंभकइत्यादिउपाकर्मप्रसिद्धानीत्यर्थः॥ वर्गाणांपरिसंख्यातंहेसहस्रेषडुत्तरे॥ वर्गाष्टौ आत्रेयोनाः संख्याबालखिल्यैर्विनातेया॥ षडुत्तरसहस्रद्वयवर्गाइत्यर्थः॥ सहस्रमेकंस्तक्तानोनिर्विशंकंविकल्पितं॥ दशसप्तसुयज्ञेते॥ सप्तदशाधिकैसहस्रंस्तक्तानीत्यर्थः॥ संख्यातंवै पदक्रमं॥ एकंग्रा

K K S U LIBRARY
RAMTEK
441 106
M-1908
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तसहस्रंवारिधिपंचाशत्सहस्राधिमेतानिचतुर्हरावासिष्ठानामितरेषांपंचाशीतिः॥एकलक्षद्विपंचाश
त्सहस्रपंचशतचतुर्हरावासिष्ठानां॥वासिष्ठगोत्रियाणांरंद्रोनिरेकसप्ततिपदात्मिकोवर्गोनास्ति॥ मि
इतरगोत्रियाणांपंचाशीत्यधिकपदानिइत्यर्थः॥अथवालखिल्यसंहितापदसंख्याउच्यते॥लक्षै
कंतुत्रिपंचाशत्सहस्रंशतसप्तकं॥पदानिचद्विनवतिःप्रमाणंशाकलस्यच॥१॥एकलक्षत्रिपंचा
शत्सहस्रसप्तशतद्विनवतिश्चाधिकानिपदानीत्यर्थः॥१५३७९२पदानिवालखिल्यस्यअर्क
संख्यानातानिच॥अधिकानितुसप्तैववर्गाअष्टहरास्मृताः॥सप्ताधिकद्वादशशतानिपदानीत्य
र्थः॥शाम्बव्यायनानां॥शांखायनानांतुवालखिल्यसंहितापदसंख्याउच्यते॥शाकल्यदृष्टपदलक्ष
मेकंसार्धंत्रिशतसत्रयुतं॥शतानिसप्तैवतथाधिकानिचत्वारित्रिंशच्चपदानिचवै॥शाक
ल्योमांडूकगणस्यः॥संहितापदानिएकलक्षत्रिपंचाशत्सहस्रसप्तशतचतुस्त्रिंशदधिकानिपदा
निइत्यर्थः॥पदानिवालखिल्यस्यरुद्रसंख्यानातानिच॥षट्पंचाशत्यधिकानिवर्गाष्टसप्तदश ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सथा॥एकादशरात्रतषट्पंचान्नादधिकबालखिल्यपदानीत्यर्थः॥अष्टपंचान्नात्यदात्मिकऋक्त्रयस्य॥
यस्तिलोवर्गोनास्ति॥तन्नुहविष्मांतस्तेहेसमीचीवर्गोत्र॥चानंतरंएकारवाग्निःऋक्॥षट्तिलोऋ
क्॥खिलस्त्रेणपठंति॥ज्योतिष्मंतमत्रचाभावःऋक्त्रयस्यतेषामेतपदाभावत्वात्॥अंतेवर्गसमाप्तौ
वावमात्रस्त्रंपठंति॥एवंहेसमीचीषट्ऋचोवर्गः॥आश्वलायन॥नानांचतुर्ऋचात्मकोवर्गः॥इत्या
श्वलायनश्रौतसूत्रयोर्भेदोस्तित्यर्थः॥यस्यमंत्रस्यपदाभावस्तस्यरैवलिकत्वंसि
द्धं॥तर्हिश्र्यंबकंयजामहेमंत्रस्यपदभावोरैवलिकत्वेसिद्धं॥नहिउमानोगौरि॥नपलेरवायं॥श्र्यंबकं
प्रथमेमंत्रेनःप्रजापतेऋतंचेत्यदक्रमंमिममुमयाग्निरमितिउमयाअर्धर्चंतिपदंगौरी॥तस्मा
त्यदक्रमेपठंति॥क्रमकालेपठंति॥क्रमोहैपदप्रतिवचनात्॥अत्रहिनीयपदंनास्ति॥अर्धर्चंतिस
मायनात्॥क्रमाभावा॥तस्मात्यदक्रमकाले षष्ठमेसएनेपदक्रमइत्यर्थः॥क्रमकालेपुवेष्टव्यं
चतुस्त्रिंशत्तत्रस्थानि॥पत्वेणत्वेचदीर्घत्वेआकारसानुनासिकं त्रिचतुःपंचक्रमेअर्धर्चंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चवेष्टयेत्॥ क्रमेणउदाहरणानिज्ञातव्यानि॥ सुषुमायाते॥ मोषुणः॥ वाजेषुसासहिर्भव॥ औंनपानसः॥
न्याविध्यदितीविनास्य॥ अगाद्वोरुरुरुश॥ विरुसंसामरुतोषसं॥ अग्निमीळे॥ ऋत्वोमित्रस्त्वं
जमिति॥ चतुस्त्रिंशत्सहस्राणिक्रमकालेषुवेष्टणानीत्यर्थः॥ द्विरंवज्ञानांसहस्राणांद्वात्रिंशत्षोडशो
त्तराः॥ षोडशोत्तरद्वात्रिंशत्सहस्राणिद्विरंवज्ञानीत्यर्थः॥ चत्वारिंशत्सहस्राणिद्वात्रिंशतंचाक्षर
सहस्राणि॥ चतुर्लक्षद्वात्रिंशत्सहस्रअक्षराणीत्यर्थः॥ द्वात्रिंशतंचाक्षरसहस्राणीतिअर्थसमाप्तेःपु
नर्वचैमुक्तं॥ अथपारायणऋक्परिमाणउच्यते॥ ऋचांदशसहस्राण्येचांपंचशतानिच॥ ऋचामक्ष
तिःपादश्चपारायणंप्रकीर्तितं॥१॥एतत्पारायणंवालखिल्यैर्विनासंख्यातं॥ वालखिल्यानिपारायणे
नसंति॥ तदुच्यते॥ ऋग्वेदांतर्गतवालखिल्यमेकादशसूक्तं॥ सप्तकसहस्रसप्तदशाधिकमित्यत्र॥ ऋ
चांदशसहस्राणीत्येतत्संख्याव्यतिरिक्तानिवालखिल्यानीतिप्रसिद्धेः॥ तन्नयत्तानुष्ठानेब्राह्मणेस्व
त्रेचश्रूयते॥ वालखिल्याःशंसंतिस्मा णावैवालखिल्याइति॥ अग्निप्रवःसुराधसमितिषड्वालखि

त्रौतनकाचार्यवचनात्। यथाप्रेषाध्यायकुंतापाध्यायनिविदाध्यायसुपर्णाध्यायश्चेतितद्वद्वालखिल्यायद्

ल्यानांस्वकानीब्राह्मणेआरण्यके॥अथवालखिल्यविहेलदुकंघोऽग्निनेतिसूत्रकारः॥श्रौतस्मार्तकर्मानु
ष्ठानेवालखिल्यप्रसिद्धिः॥वेदपरायणेवर्जमित्यर्थः॥वालखिल्यसंहितासर्वानुक्रमणीयमंत्ररूपाऋक्
संख्याउच्यते॥द्विपंचाशदधिकपंचशतसहस्राणीति॥१०५५२॥वालखिल्यव्यतिरिक्तसंख्यातु॥द्विस
प्तत्यधिकचतुःशतद्वयसहस्रऋक्॥१०४७२॥एतत्संख्यानित्यद्विपदा॥नैमित्तिकद्विपदासहितालक्ता॥
हवनाध्ययनाभ्यासमानासानित्यद्विपदा॥आसांसंख्याउपलेखायां॥तच्च॥साधुरसिक्रियासिद्धलु न
उरोदेवाउरोदेवाविदेवांस्यथावाजंमहिराधआवांसुम्नेनेतेदेवायरायस्कामःप्रतिनस्तोमंस्वायुधा
सःपितुर्नपुत्रःसनोवाजेषुगावोनयूथंपवस्वसोममंदयंनितिस्रःपरिसुवानोन्द्रभिर्यमानःप्रलंच
मर्कमनयंच्छचीभिरितिद्विपदैकपदा॥२१॥हविन्नालिस्तासांसप्तदशाद्विपदा॥१७॥एकपदाःपंचद
शि॥हवनाध्ययनेविपरीतासाजैमित्तिकद्विपदा॥ताःआहवर्गरूपेण॥पश्चानतायुदशाराधिनदश
वनेषुदशाश्रीणंदशाशुक्रःशुशुक्वांदशावनेमपूर्वीर्दशाग्नेत्वंनश्चत्वार्यग्नेभवषड्प्रसुक्रैतुदशाराजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राष्ट्रानांदनाकरैंव्यक्तादनावन्नुरेकोदनः॥परिप्रथन्वदनतंतेसोतारोद्गदनोमानुकं चत्वार्यथाहिवन
साचत्वारिनैमित्तिकहिपदाचत्वारिंशोत्तरशतमिति॥हवनेएकैका॥आध्ययनेहेहे आसांअंत्या
एकाडवींसानित्यहिपदा॥उक्तंचपरिभाषायां॥विंशिकाहिपदाविराजस्तदर्धमेकपदाहिर्हिपदा
स्रुचःसमामनंति॥अयुक्ष्वंत्साद्विपदैवेति॥द्विर्द्विपदास्रुचःसमामनंति॥यस्यस्रुक्स्यद्विर्द्विपदाः
समामनंति तास्रुचःअध्ययनेचतुष्पदाकृतेत्यर्थः॥अयुक्ष्वंत्साद्विपदैव॥स्रुक्स्यचयुजोयान
भवंतितास्त्वंत्यानिसद्विपदैव॥एवेअध्ययनेद्वावर्चिरेगवंप्राधान्ये॥त्रीण्यर्चांयाकथे॥तत्रापि
द्वावर्धमेकाऋचे॥अर्धचाएकाकर्तव्या॥अध्ययनसांप्रदायबलात्॥अनादेशोअष्टाक्षराःपादा
श्चतुष्पादाश्चर्चरितिपरिभाषायां॥अध्ययनेत्रीण्यर्धर्चऋगेवसांप्रदायोनास्ति॥आसांपरिमाणमा
ह॥अग्निंहोतारंपंचसहिरार्धेनिषळयेजायतवंत्ववि श्वाविहायाग्नित्रायेत्रेरथपंचमतदाचयेषळ
दृयाद्युपनःपंचेमांतेवाचेचत्वारिसत्रोनत्येभिर्वर्जमिंद्रायहिद्योससप्तत्यावयेषळवर्महएकाबनोति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिएकात्राजुवःपदस्तीर्णपंचेमेवांसोमाएकातिवायोएकाप्रसुज्येष्ठंषळतीदेवानांवर्जसुभुमायातंत्रीणिप्रप्रर
इः श्चतुर्थमस्तुश्रौषदूचत्वारिंशच्चाभिनोवर्जदषंनिद्रंपंचयेदेवोसोवर्जतवत्यंनयमेकासखेसरकाय
मेकायास्चात्रीण्येतास्त्रीणित्रीण्यर्धर्चाऋचाहवनीयाचतुर्नवतिसंख्यारतिात्रीण्यर्धर्चिऋकहूयंते॥
अध्ययनेअर्धर्चिहूयंतऋगेका॥अर्धर्चिनैकाएवंऋकहूयंकर्तव्येहत्यर्थः॥एकर्चस्यऋकहूयवि
राडूछंदोविनाकृथंभवतीत्यारांक्ये॥तत्रोच्यते॥विराडूछंदःसर्वछंदसिव्याप्तेवर्तते॥उक्तंचारण्यके॥
चत्वारःपुरुषारवाचःशरीरःपुरुषछंदःपुरुषोविरपुरुषोमहापुरुषरति॥तस्यास्त्रिष्लोमानित्वगायत्री
त्रिष्टूमांसमनुष्टुस्त्रावास्त्रिजगतीपंक्तिर्मज्जाप्राण॥इहलोकति॥यान्येतानिविराडूचतुर्थान्येवसुहे
दैवंविदुषएतरहःसर्वैश्छंदोभिःप्रतिपंनंभवतीति॥प्रजोभवतीत्यर्थः॥गायत्रीश्चयेकेत्रव्यतिषजति
गायत्रोवैपुरुषरतिब्राह्मणं॥अत्रोदाहरणं॥पवस्वसोममंदयंनितितिस्त्रानित्यादिपरागायत्रयरतिस
वंनुऋमणं॥हिपादेपुरुषोवीर्यंत्रिष्टूविरडूग्रामनयोर्हिविरयंयोर्हिपदयोरयंपुरुषः॥अत्रोदाहरणानि॥

ति
न्य
हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आवासुमेवरिमनुःप्रत्यंचमर्कमनयन्परिसुवानोहरिरंशुः०जगतीपाद इति॥एवंसर्वव्याप्तोभवतीत्यर्थः॥के
दाम्जातिरेतिश्रुतिः॥तथाचशतपथब्राह्मणे॥तद्याहुःकिंछंदाःकोदेवताग्नेःप्रतिष्ठेरतिद्विपदाऊंरोवि
ष्टेदेवताप्रतिष्ठेइति॥यथाविष्टुःसर्वव्याप्तःतथाविराट्छंदइत्यर्थः॥विराट्छंदस्तुचतुष्पद॥त्रीण्यथ
चैयांपंचपादाऋक्कृतेति॥किंप्रमाणंतत्रोच्यते॥एकपाद्द्वेद्विपदोविच्चक्रमेद्विपात्रिपाद्मभ्येतिपश्च
त्॥चतुष्पादतिद्विपदामभिस्वरेसंपद्यन्तेकल्पतेमानः॥एकपदाद्विपदानित्या॥द्विपात्रिपादंअभ्येति
एकीभूताभवतीत्यर्थः॥अस्योदाहरणं॥अग्निंहोतारमन्येदा०इसं॥यजुर्भ्यां०वा॥अत्रअर्धर्चशित
स्यभिश्लिष्टइतिद्विपदाइतिचतुष्पदातु॥पश्चानतायु०एकर्धर्चात्रिपदाएकर्धर्चाद्विपदाएकैकस्मिंश्च
पदाअध्ययने॥द्विर्द्विपदास्तृचःसमाम्नातेतिइत्यत्रसमभ्यादग्रहणात्॥असमानपदाविधातार्हिं
क्रियंतेपंचपदाभवति॥तस्यद्वितीयभेदोविराट्तस्मात्पंचपादत्वंमासे॥समपादावाअसमपादा
विराट्छंदः इत्यर्थः॥अत्रश्रुतिः॥समौचिश्लोनसमविष्टःसमातरा चित्०इत्यनयाऋचा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिहारः॥ दक्षिणवामहस्तौ समौ कर्त्तव्यौ असमावित्यर्थः॥ अथाध्ययने ऋक्संख्योच्यते॥ षण्णवत्यधिकचतुश्शतद्व्यासहस्राणीति॥ १०४९६॥ ताः सहितेनेमिति कृत्वा षण्णवत्यधिकचतुश्शतसहितद्व्यासहस्राणीति॥ १०५९६॥ संतानमुद्राना वदत्संतानस्य पञ्चदशर्चैकीकृत्य एकमाद्यायणे ऋक्संख्या १०५८०॥ ऋचां द्व्यासहस्राणि इति वक्तव्ये नस्य संख्यार्णाभवतीत्यर्थः॥ एकान्वितासाभद्रेणोऽपि वातयमनरतिपादाधिक्यमनुक्रमणिवत्तेष्युक्तं॥ अद्रेपुरुष इत्यारण्यके॥ अथ संतानसूक्तं॥ संतानमुद्राना वदत्संतानं वरुणो वरत्॥ संतानमिंद्रश्चाग्निश्च संतानं सविता विदत्॥ संतानं नरवेभ्यः संतानं मरणेभ्यः॥ संतानमश्विनाधुवंमिहास्मासुनियच्छतां॥ यत्कक्षीवांसंवननं पुत्रोऽंगिरसामवेतिननोघविश्वेदेवाः संप्रजासमवीवनं॥ संवोमनोसिजानतांसमाकूतिर्मनामसि॥ असौयाविमनाजननंसमावर्तयामसि॥ तच्छंयोरावृणीमहेगातुंयज्ञायगातुंयज्ञपतयेदैवीस्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वंनिगातुभेषजंनोअस्मद्द्विपदेशंचतुष्पदे॥ ऋक्॥ ५॥ १॥ नैर्ऋ ध्यंसेदारणंपरिवर्त्मतुय भविः॥ तेनाअभित्रान्बृहन्नविषाशोष

अह ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यामसि॥पन्थिवर्त्मन्येषामिंद्रः पूषाच सस्तुतः॥तेषंवो अग्निरंधानामग्निमुक्थानामिंद्रोहंतु चरंवरं॥ऐ
षुनद्यवृषाजिनंहरिणस्यधियंयथा॥परोअमित्राएषत्वर्वीगौरुपजनु॥ऋक्३॥२॥प्राधुग्णांप्र
तिवसोहोतर्वरेण्यंतुभ्यंगायत्रमुच्यते॥गोकामोअंनकामःप्रजाकामउतकश्यपः॥भरतंपाविष्युत्रसो
तिमहद्ब्रह्मैकमक्षरं॥यदक्षरंभरतऋतोविश्वेदेवाउपासते॥महर्षिमस्यगोप्तारंजमदग्निमकुर्वते॥
जमदग्निराप्यासछंदोभिश्चतुरक्षरैः॥राजःसोमस्यभक्षेणब्रह्मावीर्यावत्तं॥शिवानःप्रास्त्रौ॥रि
रा॥ऋक्४॥२॥अजोयन्नेजोहरामुक्रज्योतिःपरोगुहा॥तदृषिःकश्यपस्तोलिसत्यंब्रह्मचरा चरं॥
ध्रुवंब्रह्मचरा चरं॥आयुर्जमदग्नेःकश्यपस्यायुषंमगस्त्यस्यायुषंयदेवानो आयुषंतन्मे
अस्तुआयुषं॥तच्छंयोरावृ॰ऋक्३॥४॥इतिसंज्ञानस्तंकंपंचदशरात्रीत्मकं॥अस्यग्रहणेब्रह्मा
आश्वलायनसूत्रे॥तत्र॥समानीवरत्येकानछंयोरावृणीमहरेयंकारति॥तथादर्शोखाधिनस्य
कोपातकीसूत्रे॥तत्र॥अथोपाकर्मौषधीनांप्रादुर्भावेहेमन्तेश्रवणेनवाअहतसकूनांधानानांच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रधिरुतमिश्राणांप्रत्यृचंवेदेनजुहुयादितिहैकआहुःस्तुतानुवाकाद्याभिरितिवाअध्यायार्धेयाभिरि
तिमांडुकेयाथहस्माहकौषीतकीरग्निमाळेपुरोहितमित्येकाकुषुंभकुलदब्रवीद्यावदेतस्मैकुलेभद्रमा
वदग्नेयानाजमदग्निनाधामंतेविश्वंभुवनमधिश्रितंगंतानोयज्ञंयक्षितायःसुराभियोनःस्योअरणःप्र
तिचक्ष्वविचक्ष्वाग्नेयाहिमरुत्सखायत्तेराजन्कृतंहविरितिहृचातछंयोरावृणीमहदृत्येकाहुतस्यो षाश्च
विषःप्राश्नंतीति॥पंचशारवानांपारायणेतछंयोरावृणीमहेसत्रसमाप्तिरेकंवेदंतात्॥उतंक॥सांख्या
यनौचैवमोंकारफलंसथा॥बह्वृचाऋषयःसर्वेपंचैतेह्येकवेदिनइति॥सोरव्यायनामकंशौरवायन॰
मिति॥अथपारायणवर्गसिरव्याउच्यते॥एकर्चंएकवर्गश्च॥एकर्चंएकवर्गइत्यर्थः॥आयाहिष्वेतिद्वौ जातवेदसे
वर्गौतुदृचौस्तयौ॥द्वौवर्गौदृचाइत्यर्थः॥अग्नेतंनोअंतमः॥आयाहिवनसासहेतिऋक्त्रयस्यन्नातं
स्मृतं॥तच्चोवर्गःस्तुतइत्यर्थः॥१००॥उतत्वंचमसेनवमित्यादिचतुर्ऋचापंचसत्रान्यधिकंक्रांतंत
था॥चतुर्ऋचवर्गः॥एकास्त्रार्कद्वादशान्नानावित्यर्थः॥१२३॥आग्निमीळेइत्यादिपंचचत्वार्यधिकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुषष्टश्चोत्तुत्रातत्रयं॥षट्कृत्वर्गःपंचचत्वारिंशत्यधिकशतत्रयमित्यर्थः॥३४५॥अश्विनायज्व
रात्रिषइत्यादि॥सप्तऋचोत्रातंद्वेयंविंशतिश्चाधिकास्मृत॥॥सप्तऋचवर्गःविंशत्यधिकशतइत्यर्थः॥
॥१२०॥यज्ञेधिसत्यसोमपाइत्यादि॥अष्टऋचोत्तुपंचाशत्यधिकस्तथैवच॥अष्टऋचवर्गःपंचाधिक
पंचशतइत्यर्थः॥५३॥इंद्रंविश्वाअवीवृधंत्रित्यादि॥द्व्याधिकद्विसहस्त्रं॥एवंद्व्याधिकसहस्त्रद्वयव
र्गइत्यर्थः॥एवंपारायणेप्रोक्त॥ऋचोसंतन्यूनतः॥एवंकप्रकारेणवर्गस्यऋक्न्यूनसंख्येनइरा पूर्वार्ध
वस्यपंचऋक्कैर्कर्तव्येत्यर्थः॥एवंचतुर्विधपारायणेविहितं॥समानीवइतिवाकुलाम्नातछंदोवि
तिवाकुलानामित्यत्रवाकुलशाखाध्ययनमनुक्रमणिकोक्तंतच्च॥गौतमोदौर्द्वाजःकुत्सःपारु
छेपाद्यपरः॥कुत्सादितिप्रत्येषवाकुलाध्ययनक्रमः॥अस्यार्थः॥गौतमोदौर्द्वाजःकुत्सः॥उपप्रयंतो ११
मासत्याभ्यां॥॥अग्निंहोतारं॥इमंस्तोमं॥वेदिषदे॥एषवाकुलक्रमः इत्यर्थः॥पारुछेपाद्यैः परः॥कुत्सदि
र्घतमाह्येषतुवाकुलक्रमः॥उपप्रयंतोइमंस्तोमंनासत्याभ्यांअग्निंहोतारंवेदिषदेइतिवाकुलक्रम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यर्थः॥अत्रैकादशानुवाके मंडलेनुवाके अनुक्रमविपर्यासः॥तत्र॥खारोरभिसरंतेअभिप्रवः सुराधसंप्रसु
श्रुतमितिसूक्तद्वयं पठित्वा॥अग्नआयाह्यग्निभिरितिपठेत्॥ततःआप्रद्वाथायेत्यृग्गौर्धयरत्यनु
वाकद्वासूक्तात्मकोनुवाकस्य॥पंचदशसूक्तात्मकोवाकलस्य॥तत्रोच्यते॥गोधयतिसूक्तानंतरंय
थामनौसावरणे॥यथामनौविवस्वति॥उपमंतामघोनां॥एतत्तत्रद्वं॥भरद्वाजस्य॥इत्यंतानिपंचसूक्तानि
पठित्वाआलाग्निरथीरिवेतिपठेयुः॥अंतेसंसमित्सूक्तानंतरंपंचदशर्चात्मकंसंतानमुत्तानावदत्त
त्कुंयोराइणीमहेत्यंतंवेदसमाप्तिरितिवाकलत्रारवाध्यायने॥एवमध्ययनाभावात्॥त्रारंभावद्
त्यर्थः॥सूक्तसहस्रसंपत्रद्वाधिकात्॥अष्टौसूक्तानिवाकलस्याधिकानीत्यर्थः॥प्रतितेयुवंदेवायमृत्वि
जःरमानिवामिमितिचत्वारिवालखिल्यसूक्तेपरत्यर्थः॥यस्मादविहैहवैवाध्यधीतसनाकृष्टंभ
वतेहवाश्वत्॥अस्यार्थः॥यःतान्दंगर्थवित्वेदिलःहवनपारायणेचअधीतेसःवेदिताध्यातावनाकृष्ट
ष्टंश्वत्सदाभजतेहप्रसिद्धोहलोमुल्लोकमेत्यलस्मान्नप्रच्यवतेहित्यर्थः॥अथवारंभणफलं॥तदुक्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माण्यके॥यस्मिंसंधिंविवर्धयतितेनिर्भुंजस्यस्वमयंयजुर्वेअक्षरेअभिव्याहरतितत्प्रत्तृण्णंस्याद्यजएवोभयमं
तरेणाभयंव्याप्तंभवत्यंनाद्यकामोनिर्भुंजंब्रूयात्स्वर्गकामःप्रत्तृण्णमुभयकामउभयमंतरेणेति॥अस्यार्थः॥ह्
योःपँक्षयोर्योविस्संधिस्तस्यअविच्छेदाध्ययनंतंनिर्भुंजंसंहितापारायणउच्यते॥सुप्तेर्हूपेदक्षरेवासंधि
मकुर्वतोच्चारणंतत्प्रत्तृण्णंतत्पदपारायणं॥संहितापदाभ्यामुभाभ्यांव्याप्तमुभयमंतरेणक्रमपारायणमि
त्यर्थः॥तथाचसतित्रिभिःकृत्वास्वरास्वरंविभानात्तिमात्रामात्रांविभजतेसासंहितेति॥एवमेतासंहितायो
वेदसंधीयतेप्रजयापशुभिर्यएवंब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति इति॥तस्मात्क्रमादेतेहूप
दस्वरूपनसिध्यति॥हूपदसिध्येउत्तरारंभःकर्तुंनशक्यतेअतश्चपादार्धंक्रमःस्वरूपसिध्यर्थंभगवतापां
चालेनस्थापितानांपारायणकर्मणांक्रमपारायणमुत्तमंभवतीतिचात्रश्लोकः॥प्रगाथेनपुराद्यानंदृष्ट्वाय
सत्रऋषौमहामुनिः॥अर्थवंतंक्रमंब्रूयाद्देवतायाश्चशास्त्रतः॥अतोक्रम्यमनुष्यांहृणंपेदेस्वैश्चाध्ययनंत
थात्रिभिः॥अस्यार्थः॥अतोपिअस्मादपिहेतोःक्रमःअर्थवान्भवति॥क्रमेणकृताक्रग्वेदपारायणेक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाङ्मयेणसाधारणंभवति॥इदमित्थमेवपाठइति॥स्वरमात्रादिरूपेणनिश्चयोभवति॥यथायजुर्वेदपारायणेयजु
र्वेदेनेदंनाम्नासाधारणंस्वरमात्रादिरूपेणइदमित्थमेवपाठइतिनिश्चयोभवतीत्यतिदेशादत्यल्पंप्रपंचेन॥अ
थपारायणविधिः॥अत्रादौकलशस्थापनाचुलुकंमहार्णवे॥तीर्थदेवालयेगेहेप्रशस्तेपुण्यभूतले॥कलशंसुदृढं
तत्रसुनिर्णिक्तंसुरक्षितं॥पुष्पपल्लवमाल्याभिःश्वेतैःकुंकुमादिभिः॥स्वस्तिकायवसंभिश्रंवेदिमध्येन्यसेत्ततः॥
पंचाशद्भिःकुशैःकार्योब्रह्मापंक्त्याग्रुखस्थितः॥स्थापितस्थापितःकुंभेचतुर्बाहुश्चतुर्मुखः॥वत्सजान्वाकृतिंवद्र
उत्तरायैःकुशैःकृतं॥ब्रह्मोपधानेदत्वातततस्वस्त्ययनंपठेत्॥प्रतिष्ठाकारयेत्स्वश्चात्रजाद्रव्यमथोच्यते॥॥य
ज्ञोपवीतनैवेद्यंवस्त्रंचंदनकुंकुमैः॥स्वर्णपरीपतांबूलैरेतैश्चापिपितामहं॥॥वत्सजज्ञानमितिवाग्यश्चावा
प्रदक्षयेत्॥उपाध्यायश्चसंपूज्यथापाठेतथापठेत्॥ततोवक्ष्यमाणहोमंकृत्वापठेदिति॥॥तत्रैवबौधायनः॥॥
संडिलंकृत्यचित्वाग्निमुपसमाधायसंपरिस्तीर्यज्ञेनेताभ्योजुहोत्यग्नयेस्वाहासोमायस्वाहाविश्वेभ्योदेवेभ्यो ब्रह्मणे
ऋषिभ्यःऋग्भ्यायजुर्भ्यःसामभ्यःअथर्वाभ्यःमेधायैमेधायैधारणायैश्रियैह्रियैसाविज्यैसावित्र्यैप्रजापतयेकांडऋ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षये अग्नयेकांउऋषयेविश्वेभ्योदेवेभ्यःकांउऋषिभ्यःसंहिताभ्योदेवताभ्यउपनिषद्भ्योहव्यवाहायविश्वेभ्योदेवेभ्यो
वरुणेभ्योअनुमत्यैस्विष्टकृतेऽइदꣳहविरित्यथकस्वाहाकारेणहुत्वास्रुचिभिरुहुत्वापुनःपरिषिंचतिसमाप्तेचैतायज्ञु
षातर्पयतिएवंऋग्वेदस्यकांउऋष्यादिवर्जमास्विष्टकृतंतेषांस्थानेऽग्नयेऽर्चिर्भ्योमाध्यमेभ्योऽग्नयेसमुदायविश्वामि
त्रायवामदेवायअत्रयेभरद्वाजायजामदग्न्यायगौतमायवसिष्ठायप्रगाथेभ्यःपावमानीभ्यःक्षुद्रसूक्तेभ्योमहा
सूक्तेभ्योमहानाम्नीभ्यऽइतितेतोवेदारिभारभ्यसंततमधीयतेसाहभगवान्बौधायनः॥पुनर्महार्णवे॥अथा
तःपारायणविधिंव्याख्यास्यामः॥आसमाप्तेर्नाश्नीयाद्यथान्नाद्यंवायःफलान्नोदनंवाहविष्यमाजुमंनेभुक्त्वा
तरान्नोषमधीयीतयामात्राऽऽमुदीच्यांवादिशमुपनिष्क्रम्यअग्निमुपसमाधायपरिस्तीर्यचप्रोक्षणेनैना
भ्योदेवताऽजुहोति॥अग्नयेसोमायेंद्राग्नीभ्यांप्रजापतयेबृहस्पतयेविश्वेभ्योदेवेभ्योब्रह्मणेऋषिभ्योयजुर्भ्यःसामभ्यः
कांउऋषयेऽग्नयेकांउऋषयेविश्वेभ्योदेवेभ्यःकांउऋषिभ्यःसंहितीकाभ्योदेवेभ्योनुपनिषद्भ्योयाज्ञिकीभ्यो
देवताभ्योपनिषद्भ्योवारुणीभ्योदेवताभ्यउपनिषद्भ्योहव्यवाहायविश्वेभ्योवरुणेभ्योनुमत्यैस्विष्टकृतेऽइदꣳ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाहाकारेणहुत्वाव्याहृतिभिश्चपुनःपरिषिंचतिसमासेचैताय ज्ञुषातर्पयेदिति॥अंतेएताभ्योमाद्याः यजुषायजुर्वेदेनस
हृतर्पयेत्॥यद्वा॥भूर्देवा स्तर्पयामीत्यादियजुषातर्पयीत्वाग्न्यादीस्तर्पयेदित्यर्थः॥महार्णवे॥एवंऋग्वेदिनाकोऽ
ऋष्यादिवर्जंविष्टकृत्तंसेषांस्नाने॥ऋतवश्चेत्यादिमहानाम्नीभ्यइत्यंतंप्राग्वत्॥ततोवेदादिमारभ्यसंततम
धीयीतनास्यांतरानाध्यायोनास्यांतराजननंमरणेअशुचिः॥आशौचेनेत्यर्थः॥नोतराव्याहरेन्नाधिरमेद्धावंतम
धीयीत॥यावत्पर्यंतंपठेत्तावन्मध्येनविरमेन्नान्यच्चवदेदित्यर्थः॥यदंतराविरमेद्ब्रह्मणानाद्यमंप्रणवंवाप्रवि
धाययावत्कालमधीयीत॥ततःसर्वेनिशांतरसंख्यामारण्यसमिधंलोप्यपरिदध्यात्॥निशांतरसंख्या॥निद्रा
दीलोप्यविहायसमाप्येदित्यर्थः॥आद्यावंतेचब्राह्मंभोजनं॥दक्षिणांदद्यात्॥इतिमहार्णवोक्तं॥अथकमलाकरः॥
यएतेनविधिनावेदमधीयीतसंततः॥सतोभवतिमनःशुचिश्चभवतिवेदरूपोभवतीत्यर्थः॥ह्यश्वपारायणाद्योऋ
ग्भिश्चाभोजनइष्टापीतेन्द्रतेभ्यःप्रमुच्यते॥त्रिभिःपतनीयेभ्यःऋद्वायोरतःसिलागंगाशुचेनिमज्जनंभवति॥च
तुर्भिःऋद्वानभोजनंस्त्रीसेवनाच्चयंचभिरयाज्ययाजनाद्ब्राह्मणहणात्॥षड्भिर्ब्राह्मणस्त्रीरेतोहितकरणात्यशुहनना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तुवर्णस्तेयात्प्रतितसंयोगाद्ब्रह्मघ्नभिःप्राजापत्यस्यहीनचरणाद्ब्रह्मोपबंधनाद्ब्रह्मा
ष्टभिःश्रौद्रायणगुरुतल्पगमनाद्ब्र
ह्मस्वत्यागमनाच्चनवभिःसुरापानाद्दशभिःपुनर्जन्महेतुभिःसर्वैःपापैःप्रमुच्यतेस्वर्गलोकंगच्छतीतिपितृन्त्स्वर्गंलो
कंगमयतिअग्निष्टोमादिक्रतुभिरिष्टंभवति॥वेदाध्यायसहस्रस्यादधीतासत्यवाक्शुचिः॥यंयंकाममधीतेकाम
तंतंवेदेनसाधयेत्॥असाध्यंनास्तियत्किंचिद्ब्रह्मणोहिफलंमहत्॥ऋग्विधाने॥आदावेवतुसावित्र्याकर्म
कुर्वन्नशांतये॥पुष्ट्येपशुलाभायधनलाभायश्रुतये॥एषाहिसंहितादेवीसर्वत्रब्रह्ममयीनिरूपिता॥जुह्वेणनप
साहस्रविश्वामित्रेणधीमता॥होमंश्रजपयज्ञांश्चनित्यंकुर्वंस्तदैवतया॥सर्वकामसमृध्यर्थंपरंब्रह्मसमश्नुते॥
एषावैप्रतिलोमोत्कापसःस्रुत्रुविनाम्नी॥अस्यसप्रतिलोमेनसमभिचारेषुदास्यते॥सर्वसंहितयाप्रत्यृचंहोम
आज्येनतिलेनवा॥आज्यंद्रव्यमनादेशेजुहोतिषुविधीयते॥तिलस्तोकैः॥सर्वपापहरोमंत्रैःसर्वत्रनास्यतेस्मृति
विष्णुधर्मोत्तरेशुभ्रातातपः॥ऋक्संहितायुतंचैववेदपारायणंतथा॥तिलहोमसहस्रंचसममेतच्चतुष्टये॥इदंके
वले॥अंत्येचोद्वासने॥इतिकमलाकरभट्टकृतोवेदपारायणे॥इतिपारायणविधिःसमाप्तः॥इतिचरणव्यूहेप्रथम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ तान्येवत्रिगुणान्यधीत्यपरोभवति ५

खंडव्याख्यासमाप्त ।व्याख्याचरणंरहस्यआद्यखंडस्यतेनवै॥यथामतिविचरतोरवेंप्रसादतः॥श्रीकृष्णायनमः॥यजु
र्वेदस्यषट्शतिभेदा भवंतितत्रचरकानामहादशभेदा भवंतिचरकाआहूरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चाराय
णीयावाराय्णीयाश्चयावार्तांतेवयाःश्वेताश्वेततरौमैत्रायणीयाश्चेतिमैत्रायणीयानामसप्तभेदाभवंतिमानवाद्रुह्व
श्चैकेयावाराहाहारिद्रवेयाश्चयाःश्यामायनीयाश्चेतितेषामध्ययनंअष्टशतंयजुःसहस्राण्यधीत्यशाखापारोभवंति
तान्येवत्रिगुणान्यधीत्यक्रमपारोभवंतिषडंगान्यधीत्यषडंगवित्भवतिशिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिष
मित्येंगतिर्भवंतितत्रप्राच्योदीच्यानैऋत्यानैऋत्यस्तत्रवाजसनीयानांपंचदशभेदाभवंतिकाण्वामाध्यंदिनाःशा
वीयास्तापायनायाःकापाल्लाःपौंड्रवत्साआवटिकाःपरमावटिकाःपाराशर्यावैधेयावैनेयायोगलवाबौधेजवाःकात्या
यनीयाश्चेतिप्रतिपदमनुपदंछंदोभाषाधर्ममीमांसान्यायतर्कस्तुयांगानिषडंगोतिषंसांगलक्षणंप्रतिज्ञा
नुवाक्यापरिसंख्यातश्चरणव्यूहःशाखाकल्पप्रवराध्यायश्चशास्त्रिकंतुसंख्यानुगमयस्तपश्चत्रिहौत्रिकंच
श्वोस्थानिकूर्मलक्षणंइत्यष्टादशापरिमिष्टानिभवंतिसहस्रेणातेनूनेमंत्रेवाजसनेयके॥इतुक्रमेणतत्सकलं

द्विज

औधेया

परिसंख्यात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सम्युक्लिये॥ येथाश्वपरिसंख्यातंब्राह्मणंचचतुर्गुणं॥ तत्रैतैत्तिरीयकानांहिभेदाभवंतिऔरव्याकांडिकेयाश्वेतिकांडिकेया
नांपंचभेदाभवंतिआपस्तंबीबौधायनीसत्याषाढीहिरण्यकेशीऔधेयीश्वेतितत्रकठानांतूपगायतुचतुश्चत्वारिं
शत्युपयंथाः॥ मंत्रब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यते॥ यजुर्वेदःसविज्ञेयोन्येशाखांतरसंस्कृताः॥ तेषामध्ययनंप्र
वचनीयाश्वेति॥२॥श्री॥ यजुर्वेदस्यषडशीतिर्भेदाभवंति॥ अत्रशाखाभेदोग्राह्यः॥ षडशीतिर्भेदादित्यर्थः॥
तत्रचरकानामदाद्यभेदाभवंतिइतिस्पष्टार्थः॥ तेकेभेदाः॥ चरकाः॥ आदूरकाः॥ कठा॥ प्राच्यकठा॥ कपिष्ठलक
ठा॥ आरायणीया॥ वारायणीया॥ वार्तांतरेया॥ श्वेता॥ श्वेततरा॥ औपमन्यवः॥ मैत्रायणीयाश्वेति॥ इतिहाद्या
मैत्रायणीयशाखागणाइत्यर्थः॥ मैत्रायणीयस्तुवाजसनीयेवदाध्यायीमानवकर्मसूत्रं॥ तेषामध्ययनमष्टौत्र
शत्यजुःसहस्राण्यधीत्यशाखापारोभवति॥ तेषामध्ययनेहित्वात्रिंशदध्यायः॥ अष्टशताधिकसहस्रमंत्रादित्य
र्थः॥ तान्येवत्रिगुणान्यधीत्यषट्पारोभवति॥ द्विवारपठनात्सपारायणपठनंभवतीत्यर्थः॥ तान्येवत्रिगुणान्यधीत्य
क्रमपारोभवति॥ त्रिवारपठनात्क्रमपारायणंभवतीत्यर्थः॥ परक्रमाध्ययनंभवतीत्यर्थः॥ तत्रप्राच्यांउदीच्यानेकेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिर्कृत्स्नत्रवाजसनेयापंचदशभेदाभवंति॥ माध्यंदीन्यनैर्ऋत्यांतिस्रोदिशांवाजसनीयवेदोत्पत्तिः॥ अथेदानींवस्यामः॥ तत्रेदंश्लोकवेदशाखाविभागोच्यते॥ तच्च॥ महार्णवे॥ इदंतुमध्यदेशेवाचनमंदरापरिकीर्तिता॥ दक्षिणोत्तरयोर्भागेशाखाभेदाश्चउच्यंते॥ १॥ नर्मदादक्षिणेभागेआपस्तंबाश्वलायनी॥ बौधायनीवधिष्ण्यालाचयत्सकन्यादिभागिनः॥ २॥ माध्यंदिनीशांखायनीकौथुमाश्चौनकीतथा॥ नर्मदोत्तरभागेचयत्सकन्यादिभागिनः॥ ३॥ तुंगाश्चज्ञातथागोदासह्याद्रिःशिखरावधिः॥ आओंध्रदेशपर्यंतंबह्वृचश्चाश्वलायनी॥ ४॥ उत्तरेगुर्जरेदेशेवेदोबह्वृचकीर्तितः॥ कौषीतकीब्राह्मणंचशांखायनंगवायनीश्चिना॥ ५॥ आंध्रादिदक्षिणाश्रेणीगोदासागरआवधी॥ यजुर्वेदस्तुतैर्याआपस्तंबीप्रतिष्ठिता॥ ६॥ विंसोमेआसेचभव्याधानेतथैवच॥ एतैस्त्रजातिभिःकुर्यादन्यथापतितोभवेत्॥ ७॥ अध्वर्यूद्गातृहोतॄणांसंतिसत्राण्यनेकशः॥ यत्रास्तियोनिसंबंधस्तत्रज्ञातकलान्वितः॥ ८॥ सह्याद्रिःपर्वतारंभाद्गोदांवेर्ऋत्यसागरात्॥ हिरण्यकेशीनीरवचिपर्शुरामस्यसंनिधौ॥ ९॥ मयूरपर्वतांचैवयावद्गुर्जरदेशतः॥ याज्ञावाय्यदेशातुमैत्रायणीप्रतिष्ठिता॥ १०॥ अंगवंगकलिंगश्चकानीनोगुर्जरस्तथा॥ वाजसनीयशाखाचमाध्यंदिनीप्रतिष्ठिता॥ ११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषेणायातव•न्येनसर्वदेशेषु विस्तृता॥ वाजसनीयवेदस्यप्रथमाकण्वसंज्ञकारति॥१२॥ व्यासशिष्योवैशंपायन
निगदाख्ययजुर्वेदंपठित्वाशिष्यान्चकार॥तच्चभागवते॥वैशंपायनशिष्योवैचरकाध्वर्यवोभवन्॥यच्चैतद्ब्रह्महत्या
दुःक्षपणंस्वगुरोर्व्रतं॥यास्यवन्त्यश्चतश्चिष्याअंशाहोभवावान्क्रियत॥चरितेनाल्पसाराणांचरिष्येहंसुदुश्चरं॥इ
त्युक्तागुरूरत्याहकुपितोयाह्यलंत्वया॥विप्रावमंत्रात्शिष्येणमधीतंत्यज्यतामिति॥इदंरातसुतः सोपिछर्दित्वायजु
र्गणं॥ततोगतोथमुनयोदद्रुस्तान्यजुर्गणान्॥यजुंषीत्तित्तिरीभूत्वातल्लोलुपतयाद्रुः॥तैत्तिरीयाइतियजुः॥रा
त्रावासंतत्कृपेशाला॥यास्यवन्त्यस्तथाब्रह्मन्छंदांस्यधिगवेषयन्॥गुरोरविद्यमानानिसूपस्तस्थेर्कमीश्वरंसयात्
व ...स्यउवाच॥ॐनमोभैवतेत्यादि॥जीर्णभुक्तउच्छिष्टवांतेयातयामन्नाद्इतिनिघंटः॥एवमेवार्थः॥यातयाम
यतुः॥कामउपसरामिसंतंतुष्टाव॥एवमुक्तःसभगवान्वाजीरूपधरोहरिः॥यजूंषियातयामानिमुनयेदात्प्रसादतः॥
यजुर्भिरकरोद्वाजान्रूपंचक्रेतदद्भुतं॥जगृहुर्वाजिसन्यस्ताःकाण्वमाध्यंदिनादयः॥इत्यादिग्रंथपर्यालोचनया
यजुर्वेदत्यागानंतरंदेवरातस्यकृतेनअ ...णत्वाभयास्तवितुस्तस्यवाजिरूपेणवाजिभ्यःकेसरेभ्यःवाजिनवेगनवास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृताः त्यक्ताः शारवा वाजसनेयासंज्ञाः शारवारंभुत्वपरिहारार्थं चातुर्वेदित्वसंरक्षणार्थं च वाजीरूपेणसूर्येणोपा[illegible]ताः
मानियानियजूंषिमुनयेचक्तानितैर्यजुर्भिरुपगीतैः समुद्गिताः वाजसन्यः पंचदशः शारवाअकरोत्।तस्माज्जमुनेः काण्व
माध्यंदिनादयः अध्ययनंचक्रुः॥तेपंचदशाभवंति॥तथाचविष्णुपुराणे॥यजुर्वेदस्यविस्तरंभागमाह॥यजुर्वेदत
रः शारवाः समभवन्महामुने॥वैशंपायननामासौव्यासशिष्यःश्रुतोद्विजः॥शिष्येभ्यःप्रददौतांश्चजगृहुस्ते[illegible]ष
नुक्रमात्॥याज्ञवल्क्यस्ततस्याभ्रह्महरातःसुतोद्विजः॥शिष्यःपरमधर्मज्ञोगुरुवृत्तिरतस[illegible]दा॥ऋषियेद्विज
होमिरोसमाजमागमिष्यति॥तस्यवैसमयोत्रैतद्ब्रह्महत्याभविष्यति॥सर्वमेवमुनिगणैःसमयोयंकृतोद्विज॥वैशं
पायनएकस्तुव्यतिक्रांतवांस्तथा॥स्त्रियंबालंकंसोथपदघ्नमघातयत्॥शिष्याह्यब्रह्महत्यापरं
व्रते॥वरश्चैमल्लोतसर्वंनविचार्यमिदंतथा॥अथोहयाज्ञवल्क्यस्तंकिमेतैर्बहुभिर्द्विजैः॥कूरितेरल्पतेजो[illegible]भि
शिष्यैरभिदंव्रते॥ततःक्रुद्धोगुरुप्राहयाज्ञवल्क्यंमहामुनिं॥मुच्यतांयत्त्वयाधीतमत्तोविप्रावमानकः॥निस्तेज
सोवरस्यतान्मस्त्वेब्राह्मणपुंगवान्॥तेनशिष्येणनार्थोस्तिममाज्ञाभंगकारिणा॥याज्ञवल्क्यस्ततःप्राहभक्त्यैत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेमयोदितं॥ममाप्यलंत्वयाधीतंयभ्रयातदिदंद्विज॥श्रीपराशरउवाच॥इत्युक्तःस्वधिराक्रान्तिस्वपाणिचयजूंष्यथ॥छ
र्दयित्वाददौतस्मैयाज्ञवल्क्यायमुनिः॥यजूंष्यथविसृष्टानियातत्रत्यक्त्वेनवैद्विज॥जग्मुस्तितिरीभूत्वातैत्तिर्यास्तुव
ततः॥ब्रह्महत्याव्रतंचीर्णंगुरुणानोदितंतुषैः॥चकाराध्वर्यवंक्रतुंचरणान्मुनिसत्तम॥याज्ञवल्क्योपिमैत्रेयप्रा
णायामपरायणः॥तुष्टावप्रेतःसूर्यंयजूंष्यभिलषंततः॥याज्ञवल्क्यउवाच॥नमःसवित्रेहारायमृत्योरमिततेजसे॥
ऋग्यजुःसामरूपायत्रयीधामात्मनेनमः॥इत्यादिपराशरउवाचेत्येतान्स्तुतिंकृत्वाईत्येवमादिभिस्तुनस्तूयमानस्तैर्व
विः॥वाजीरूपधरःप्राहह्रीयतामभिवोदितं॥याज्ञवल्क्यस्तथाप्राहप्रणिपत्यदिवाकरं॥यजूंषितानिभेदृष्टियानि
संतिनमेगुरौ॥पराशरउवाच॥एवमुक्तोददौतस्मैयजूंषिभगवान्रविः॥अयातयामसंज्ञानियानिनैदृक्षितत
हुरुः॥यजूंषिवैरथीतानितानिविप्रैर्द्विजोत्तम॥वाजिनस्तेसमाख्याताःसूर्यैरेवोदयंप्रति॥शाखाभेदस्तुते
षांवेदव्यासेनचैवाजिनां॥काण्वाधारुक्रमहाभागायाज्ञवल्क्यप्रकीर्तिताः॥इति॥वाजसनेयवेदोत्पत्तिरित्यर्थः॥ १७
काण्वामाध्यंदिनाःशाकीयाः॥स्यापाथनीयाः॥कापात्याः॥पौंड्रवत्साः॥आवटिकाः॥परमावटिकाः॥पाराश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्मवैधेया॥औधेया॥गालवा॥वैजवाः॥कात्यायनी॥याश्वेति॥पंचदशान्नाख्वाइत्यर्थः॥प्रतिपदमनुपदं॥प्रतिपदेअनुपदं॥अल्पपदंकर्तव्यमित्यर्थः॥छंदः॥छंदोरत्नाकरादि॥भाषा॥राङ्कपरिभाषा॥धर्मः॥धर्मशास्त्रमिताक्षरादि॥मीमांसाप्रसिद्धा॥न्यायः॥कैतैः॥इतिषड्वेदांगानि॥उपज्योतिर्ज्योतिःशास्त्रं॥सांगलक्षणंसामुद्रिकादि॥प्रतिशाखमनुवाक्यः॥अनेनवाक्येनअयंसिध्यति॥परिसंख्या॥श्रवणोलादि॥अतःश्रवणव्यूहः॥श्राद्धकल्पः॥प्रवराध्यायश्च॥सशुक्लयजुर्वेदसंख्याकत्यादिपुस्तालय्या॥अनुगमयतंयत्तक्रिया॥पार्श्वाग्निहोत्रिकं॥यत्तक्रियाहोत्रं॥पशवोक्यामिपसुयत्तः॥कूर्मलक्षणं॥यत्रैप्रसिद्धं॥इतिअष्टादशपरिनिष्टानिभवंति॥हैसहस्रेशतेन्यूनमंत्रेवाजसनेयके॥इत्युक्तमेतत्सकलंसशुक्लंयंत्रेथाश्वपरिसंख्यातं॥वालसनेयकेवेद॥नवशताधिकसहस्रमंत्रेत्यर्थः॥एतत्सकलंसशुक्लियंमध्यान्हेशुक्लवर्णनसूर्येणदत्तःसशुक्लयजुःपरिसंख्यातमित्यर्थः॥वेदोयत्रमणेचतुर्दशीयुक्तपौर्णमाग्रहणात्॥शुक्लयजुः॥प्रतिपदायुक्तपौर्णमाग्रहणात्॥कृष्णयजुरितिदा॥ब्राह्मणंचचतुर्गुणं॥वेदचतुर्गुणंब्राह्मणमित्यर्थः॥यजुर्वेदतेरासनूशाखाद्यैकोत्तरंशतं॥तत्रापिचत्रिंशाका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रादरापंचचवाजिनं॥तत्रापिप्र थमामुख्यात्रागवेयंकाण्वसंज्ञक॥इतियेथांतरे॥तैत्तिर्यकानांहिभेदाभवंति॥औ
रव्यासंहितेत्याश्चेति॥कांडिकेयानांपंचभेदाभवंति॥आपस्तं॥बौधायनी॥सत्याषाढी॥हिरण्यकेशी॥औधेयी
श्चेति॥तेषामध्ययनपरिमाणं॥कांडांस्तुसप्तविंशेयाप्रश्ना धिकैवचतु॥चत्वारिंशत्तुविंशेयाअनुवाकाःरा
तानिषट्॥एकपंचाशदधिकासंख्यापंचाशदुच्यते॥द्विसहस्रंचैकशतमष्टानवतिश्चाधिका॥लक्षैकंतुद्विनवति
सहस्राणिप्रकीर्तितं॥पदानिनवतिश्चैवलक्षाण्यष्टशतंतदुच्यते॥लक्षद्वयंत्रिपंचाशत्सहस्राणिशताष्टकं॥अष्टष
ष्ट्यधिकंचैवयजुर्वेदप्रमाणकं॥कांडः॥७॥प्रश्न॥४॥अनुवाक॥६५१॥पंनात्री॥२१८४॥पैनात्री॥२१९२०॥अक्षरसंख्या॥
२५३९८॥राख्यावाक्यात्र्यधिकानिसहस्राणिनवानिच॥चतुःशताव्यशीतिश्चअष्टौवाक्यानिगण्यंते॥
इतिब्राह्मणेअष्टौवाक्यसंख्या॥१९४८०॥इतितैत्तिरीयनिगदेवेदाख्यसंख्यानिरूपणंसमाप्तं॥अथमंत्रब्राह्मणोत्पत्ति
गाथलुः॥चतुश्चत्वारिंशादुपरिष्टाथा॥मंत्रब्राह्मणयोर्वेदइतित्रिगुणंयत्रपठ्यते॥यजुर्वेदसंवि०स्मृताः॥चतुश्च
त्वारिंशत्तुपरिष्टाथाः॥अध्यायाःसमीपेयुक्ताःश्चतुश्चत्वारिंशत॥मंत्रश्चब्राह्मणश्चमंत्रब्राह्मणेतयोःमंत्रब्राह्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णयोः तयोश्चेवदृतिसंज्ञा॥ तदुक्तमेत्रेयब्राह्मणयोर्वेदृतिनामधेयमिलृक्कशारवीयप्रतिशाख्यभाष्यकारेणआप
लंबसामान्यसूत्रभाष्यकारेणकपर्दिनाऽर्तस्वामिनाचतथाचसतिमंत्रोनामसंहितामंत्रशा दृक्मंत्रास्संसं
हितायाः तन्मध्येएवदृग्ब्राह्मणत्वेनपठनमित्युभयतापिसंहितात्वेनपदत्वेनक्रमत्वेनचपठनेत्रिगुणंव
पठनमितिसमंत्रब्राह्मणयोर्वेदृत्रिगुणंयत्रपठ्यतेइत्यर्थः॥ एतादृशंपठनेशारवायांऽध्ययनेसय
जुर्वेदस्यचेत्तिरीयशारवायांएवास्ति॥ तथाहिसंपन्नयामिप्रजाअहमित्याहप्रजाअहार्मेप्रजासोमानवी
रितिसंहितामंत्राः॥ एतस्यैवब्राह्मणेसंहितायामेवतदग्रेएवसंपन्नयामिप्रजाअहमित्याहयावंतएवंतिब्रा
ह्मणमित्युभयोरपिसंहितात्वेनपदत्वेनक्रमत्वेनपठनेत्रिगुणितंपठनेभवति॥ एतादृन्नामुदाहरणंतस्मा
दृ॥ इमामगृभ्णंत्रशानामृतस्यपर्दआयुषिविदथेक्षितिसंहितामंत्रः॥ एतस्यैवब्राह्मणसंहितायामेव
तदग्रएवंसंहितारूपेणवर्तते॥ तत्कथमित्यपेक्षायामाह॥ इमामगृभ्णंत्रशानामृतस्येत्यभिधानीमाद
शतिब्राह्मणे॥ अमयोरपित्रिगुणंत्वेनपठनं॥ उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः॥ इतित्रिगुणेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पठनेभवति॥एतेत्रिगुणःकस्यापिन्नाख्यायानभवंति॥किंतुगाथायंथत्वात्॥एवमन्यानिबहून्यपिवाक्यानिसंति॥
तानिविस्तारभयान्नोक्तानि॥अतःकारणात्॥अन्येन्नाख्यांतरासृतः॥तेषामध्ययनंप्रवचनीयाश्चेति॥एतेषांन्ना
ख्यानांअध्ययनंप्रवचनीयाःप्रतिवचनापत्तेनसमाप्तिमित्यर्थः॥इतिचरणव्यूहेद्वितीयःकांडःसमाप्तः॥साम
वेदःकिलसहस्त्रभेदासीदनाध्योषधीयानास्तेनाक्रेणाभिहताःप्रनष्टाश्चोषान्प्रवक्ष्यामिआसुरायणीया
वासुरायणीयावार्तांतरेयाभाज[illegible]लऋस्वैनविधाप्राचीनयोग्यानयोग्याराणायनीयाश्चेतिराणायणीयानंव
विधानंभवंतिराणायनीयाःशाट्यायनीयाःसात्यमुद्गलाःरौढामहारव्वल्वलाःखांगलाःकौथुमगौतमाजैमि
नीयाश्चेतितेषामध्ययनंअष्टौसामसहस्त्राणिसामानिचतुर्दशान्यष्टौब्राह्मणानिदशभिर्दशसप्तसुवाक्तरिव
ल्यःसुपर्णःप्रेत्यमेतत्सामगणंस्मरतं॥३॥आसांवोऽन्नाम्नारवानांतिस्रन्नाम्नारवाश्चविद्यते॥ताश्च॥गुर्जरदेशेको
थुमाःसिद्धाः॥कर्नाटकेजैमिनाःप्रसिद्धाः॥महाराष्ट्रदेशेराणायनीयाइति॥तेषांअध्ययनं॥अष्टौसामस
हस्त्राणिछंदोगार्चिकसंहिता॥गानोनिलस्यवक्ष्यामिसहस्त्राणिचतुर्दश॥अष्टौब्राह्मणानितेषांनिर्ब्राह्मणरत्नथैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च॥ब्राह्मणेचोपनिषदःसहस्रंचित्तयंतथा॥सामवेदइति॥किलेतिप्रसिद्धौ॥सहस्रमेदआसीत्॥सहस्रभेदमध्येवज्रेणकेण
वज्रेणाभिहताःप्रक्षिप्ताः॥अवाध्यायेषुधीयमानाःम्रीयंतेविद्युदाख्यवदिति॥शेषानहतान्शाखाषाठकान्व्याख्या
स्यामः॥असुरायणीयावासुरायणीयावार्तातरेयाःप्रांजलऋग्वैनेविपाःप्राचीनयोग्यानयोग्याराणायनीयाश्चे
ति॥राणायनीयानामपिचत्वारोभेदाभवंतिराणायनीयाःशाट्यायनीयाःसात्यमुग्रयाःखल्वलामहाखल्वलालांग
लाःकौथुमागौतमाजैमिनीयाश्चेति॥तेषामध्ययनमष्टौसाहस्राणिसामानिचचतुर्दशान्यष्टौब्राह्मणानिद्
शाभिर्द्व्यासप्तसुवालखिल्यःसुपर्णःप्रेक्षितसामगणंस्मृते॥अथप्रकाण्डांतरेणाह॥तत्रराणायनीयानामस
प्तभेदाभवंतिराणायनीयाःसात्यमुग्रयाःकाल्वयाःमहाकाल्वयालांगलाःशाट्यलाःकौथुमाश्चेति॥तत्रकौथूमीय
भेदाभवंतिकौथुमाः॥असुरायणाःवार्ताताःप्राजलिदैवतंश्रुतः॥प्राचीनयोग्याःऋग्वैनेयाःविप्राइति॥
तेषांकौथुमाद्यानामध्ययनेऽशीतिर्मृतमाग्नेयंषावैनेचतुःशतं॥ऐंद्रंतुषड्विंशतिःगायंति॥तानिस्तुक्तानिअ
धीत्यचंउत्सृष्टाःतेचंउक्ताःअत्युत्सृष्टाभवंति॥अशिष्टानिव्यतिरिक्तानिअधीत्यपठित्वाशिष्टाविंशतिकाभ

न
म
मा

नाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वंति॥शिष्टान्प्राप्नोणिकान्॥विंशतिषष्टेषुवा॥शिष्टाभवंतीत्यर्थः॥तद्यस्तेषुकेचिन्मंत्रवंतोब्राह्मणाः॥मंत्राश्चतुर्धाविधीयंते॥आर्चाः॥तदाहुः॥ऋक्तंत्रे॥साम
तंत्रे॥संतानवंत्रे॥धातुलक्षणमितिषट्सामसंख्यामाह॥अष्टौसामसहस्राणिसामानिचचतुर्दश॥॥अ
ष्टौशतानिनवतिर्विंशतिर्वालखिल्यकं॥सरहस्यंससुपर्णंप्रेक्ष्यनस्तोमदर्पणं॥सारण्यकानिसौर्याणिएतत्सा
प्रगणंस्मृतं॥अशीतिशतमाग्नेयं॥१८०॥पावमानं१०४ऐंद्रंतु६शिष्टाश्चगणनाश्रयाः॥अष्टौसामसहस्राणि
सामानिचचतुर्दश॥॥अष्टौशतानिनवतिर्विंशतिर्वालखिल्यकं॥अस्यार्थः॥८९४अंकतोज्ञातव्यः॥अस्यशा
खासंख्यामाह॥नवतीति॥सुपर्णःप्रेक्ष्यःकश्चिच्छाखाभेदस्तेनसहवर्तमानःससुपर्णप्रेक्षः॥सुपर्णप्रेक्षेणस
हितोवालखिल्यः॥शारवभेदानवतिः॥॥नवतिसंख्याकाःदत्रादत्रानयोयस्मिन्सनवतिदत्रारति॥दत्रौपितिदत्रा
संख्यासंज्ञादत्रगुणानवतिरित्यर्थः॥अंतेके वि०सारण्यकं॥आरण्यकेनोपनिषद्भागेनसहवर्तमाना
निसौर्याणिसूर्यदेवत्यानिसूक्तानि॥॥तत्रवालखिल्यशाखायाम्॥आरण्यकस्यसूक्तंसुपर्णप्रेक्षवाल

ति

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिक्त्यानिर्मिलित्वानवनातानीत्यर्थः॥निगमयति॥एतदिति॥एतत्पूर्वोक्तसामसमूहस्मृतंकथितं॥गणान्नाद्
स्यबलीयस्त्वंशोभते॥राणायनीसात्यमुग्रीद्वर्वासाअथवागुणा॥गौरुडीगौर्गुर्जरीभगवानौपमन्यवः॥द्वारा
त्रेणार्ग्यसावर्णिवर्षगण्यश्चैतदन्न॥कुथुमिन्नालिहोत्रश्चजैमिनिश्चत्रयोदन्ना॥इत्येतेसामगाचार्याः॥अथर्ववे
दैतर्षितादृतितेअथर्ववेदस्यनवभेदाभवंतिपैप्पलादांताप्रादांतास्तौदौतांब्रह्मदाचार्वन्नौनकवेदरूचिचरणवि
द्याश्चेतितेषामध्ययनंपंचकल्पाभवंतिकल्पेकल्पेपंचरात्रैरविनक्षत्रकल्पोविधिविधानकल्पासंहिताक
ल्पः शांतिकल्पश्चेतिसर्वेषामेववेदानामुपवेदाभवंति॥ऋग्वेदस्यायुर्वेदोयजुर्वेदस्यधनुर्वेदउपवेदोसा
भवेदस्यगांधर्ववेदउपवेदःअथर्ववेदस्यनारदन्नात्मानिभवंति॥ऋग्वेदस्यात्रिगोत्रंब्रह्मदैवत्यंगायत्र
छंदोयजुर्वेदस्यभारद्वाजगोत्रंविष्णुदैवत्यंत्रैष्टुभंछंदःसामवेदस्यकाश्यपगोत्रंरुद्रदैवत्यंजागतंछं
दोथर्ववेदस्यवैजालगोत्रंमैत्रदैवत्यमानुष्टुभंछंदःऋग्वेदोरक्तवर्णःपद्मपत्रायताक्षःसुविभक्तग्रीवःकुं
चितकेशश्मश्रुप्रमाणोनदीरश्मिमात्रोयजुर्वेदःकृष्णोदीर्घःकृपाद्रीत्तांम्रवर्णोकांचननयनंआदित्यव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्जनपंचालिमात्रः साम्नवेदोनित्यस्रग्वीश्रुचिःशुचिवासीक्षौमीहंतीचर्मदंडीकांचननयनश्चेतवर्णोवर्णेनषड्
लिमाग्रोथर्ववेदःतीक्ष्णशृंगःरुक्षःकामःकामरूपीक्षुद्रकर्मीश्वेतसाध्यवत्राश्चस्रजगलमरुणनिगालयः
स्वदारतुष्टःपरस्त्रियान्यथश्चेति॥यद्दंदैवतरूपेणोत्रप्रमाणंछंदोवर्णोवर्णयंति॥जन्मजन्मनिवेदधा
रीभवतिजन्मजन्मनिवेदधारीभवतिअग्रहितःग्रहितोभवतिअव्रतोव्रतीभवत्यब्रह्मचारीब्रह्मचारिभवति
ओतिस्मरोजायतेनमःशौनकायनमःशौनकायनमःपरमऋषिभ्योनमःपरमऋषिभ्योनमः॥यद्दंचरण
मूरंधर्वसश्रावयेद्द्विजः॥धौतपाप्माशुचिर्विप्रोब्रह्मश्रयाकल्प्यते॥१॥यद्दंचरणव्यूहंआथर्वणसद्
पेठत्॥अश्रथ्यंतद्धवक्ष्यामिपितृभ्यश्चेवोपतिष्ठति॥२॥यद्दंचरणव्यूहंगुर्विण्यःश्रावयेद्विजेभ्यः॥पुमांसंजन
येत्पुत्रंसर्वज्ञंवेदपारगं॥३॥योधीतेचरणव्यूहःसविप्रःपंक्तिपावनः॥तारयेत्यखिलांष्टूर्वान्पुरुषांस्तासप्तच॥४॥
योनामपुरावेदाअमृतंवंचगछति॥लोकतांतंमहाशांतंअमृतंवंचगछत्यमृतंवंचगछत्याहभगवान्व्यासः॥
पाराशर्योव्यासःपाराशर्यः॥नमःपरमऋषिभ्योनमःपरमऋषिभ्योनमः॥तंवेदंशास्त्रपरिनिश्चितंशुधवु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[redacted]

[redacted]

[redacted]।अथर्ववेदइति।अथर्ववेदस्यनवशाखाभवंतीत्यर्थः।तानाह।पैप्पलादांताः प्राग्वत्।
ता तासांऔतावह्मराष्ट्रौनकवेदस्त्रिचरणविद्याश्चेतितेषामध्ययनेहादशसहस्राणियत्रबहुवचनंतेबहवः॥
यत्रैकवचनंसएकएव।तेषामध्ययनंसंख्योच्यते॥द्वादशसहस्राणिमंत्राणां॥कल्पानिपंचकल्पानि॥क
ल्पेकल्पेएकस्मिन्कल्पेपंचशतानिमंत्राणांकल्याह॥नक्षत्रकल्पः१विधानकल्पः२संहिताविधिकल्पः३
अभिचारकल्पः४शांतिकल्पः५इतिपंचकल्पः॥वेदानांचत्वारउपवेदाभवंति॥आयुर्वेदश्चिकित्साशास्त्रं॥
ऋग्वेदस्योपवेदः१॥धनुर्वेदोयुद्धशास्त्रं॥यजुर्वेदस्योपवेदः२॥गांधर्ववेदस्यसंगीतशास्त्रंसामवेदस्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदः॥१॥अथर्वशास्त्रंनितिशास्त्रंविश्वकर्मादिनिर्मितंशास्त्रं॥अथर्ववेदस्योपवेदः॥४॥भगवान्व्यासःस्कंदकुमारोवा
रुति॥यद्यप्येचत्वारोवेदाउक्तास्तेषांमध्येऽकैकस्यकीदृशंरूपंअकि॥रःवतत्तद्वर्णसिध्यासिनास्तिवर्णअकारश्चो
च्यते॥ऋ॰ग्वेदस्वरूपमाह॥ऋग्वेदःपद्मपत्रायताक्षः॥पद्मपत्रंकमलदलंतद्वद्दक्षिणेनेत्रंयस्यसः॥सुविभ
क्तशीर्षः॥सुविभक्तःरेखाभिःकिताशीर्षायस्यसः॥कुंचितकेशश्मश्रुःकुंचितावक्रौश्मश्रुनःकेशाःशिर
सिजाः॥श्मश्रूणिमुखरोमाणियस्यसः॥वर्णेनश्वेतवर्णः॥श्वेतोवर्णोयस्यसः॥तावत्साकल्येनपंचविंश
स्तात्॥भवंतिनिर्मितंप्रमाणंऋग्वेदस्यकीर्तितंऊर्ध्वंवितस्तयःशब्दोद्वादशांगुलः॥सार्धंहस्तद्वयप्रमाण
मित्यर्थः॥यजुर्वेदस्वरूपमाह॥पिंगेपीतेअक्षिणीयस्यसः॥ऊरोःप्रथमऊरोमध्येकटिप्रतिदे
शेपस्यसः॥स्थूलगात्रकःस्थूलौगात्रकौलोपौयस्यसः॥ताम्रपीतवर्णः॥ताम्रपीतस्ताम्रवदाचर
तोरक्तोवर्णोयस्यसः॥यद्वा॥रूक्षवर्णः॥रूक्षोवर्णोयस्यसः॥हीर्घलेनोच्चत्वेनषट्प्रोक्तोमात्रैःषं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षट्प्रादेशप्रमाणंवस्यसः॥प्रमाणेमात्रच्अत्यर्थः॥प्रादेशस्तर्जनीमध्यमयोर्विहितत्वात्॥प्रमाणेप्रादेशमात्रोदण्डंगुलः॥तादृशाःषट्प्रादेशाःप्रमाणं॥षष्ट्यंगुलसार्धहस्तमित्यर्थः॥२॥सामवेदस्तरूपमाह॥सामवेदोनित्यस्रग्वीस्रजोअस्यसतीतिस्रग्वी॥अस्मायामेधास्रजाविति॥नित्यपुष्पमालाधारी॥सप्रयतनित्यवान्॥शुचिःपवित्रःशुचिवासःशुचिशुक्लवासोवस्त्रंयस्यशुक्लवस्त्रधारी॥रामी॥रामःरांतिरस्यास्तीतिरामी॥रांतम्नाः॥रांतः॥निधनवान्योदृश्यः॥दृढशरीरः॥दृढन्महत्शरीरंवस्यसः॥रामीदृढीरामीतरोदृढोयस्यसः॥कातरदृक्षचेष्टोहीनयमेत्रेयस्यसः॥वर्णनआदित्यवर्णः॥आदित्यस्यभानोर्वर्णइववर्णोयस्यसः॥नवारत्निमात्रः॥नवअरत्नेप्रमाणंयस्यसः॥
५ सार्धचतुष्टयहस्तदीर्घयस्यसः॥३॥अथर्ववेदस्वरूपमाह॥अथर्ववेदस्त्रपुनःतीक्ष्णउग्रःप्रचंडः॥क्रोधी॥कामरूपी॥कामनरूपाणियस्यसः॥स्वेच्छारूपधारि॥विश्वात्मा॥विश्वस्यात्मा॥विश्वस्यकर्तृस्रष्टाचउपनिषद्ब्रह्मेत्याह॥क्षुद्रकर्मी॥क्षुद्राणिकर्माणियस्यसः॥आभिचारकृत्साप्रयोजकमंत्रवाहुत्यात्॥स्वशाखाध्यायी॥अथर्वणिदिग्रोषः॥उत्तरश्यामकर्मरंगलथावर्णोयस्यश्यामसंहरः॥दृढाश्वरत्निमात्रः॥दृढाअरत्नयः॥प्रमाणंयस्यपंचहस्तप्रमाणइत्यर्थः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथचतुर्वेदानां॥गोत्रदेवतानांछंदसामाह॥ऋग्वेदस्यात्रेयगोत्रं॥आत्रेयाःसगोत्राःसमानगोत्रायस्यतत्॥अ
त्रिगोत्रऋग्वेदइत्यर्थः॥सोमोदेवत्यं॥सोमोदेवत्ययस्यतत्॥गायत्रीछंदः॥गायत्रीछंदोयस्यतत्॥एवमग्रेण
व्याख्यातव्यं॥१॥अथयजुर्वेदस्वरूपं॥काण्वमुपगोत्रंरुद्रोदेवत्यंत्रिष्टुप्छंदः॥काश्यपगोत्रंरुद्रोदेवत्यं त्रिष्टु
छंदस्कोयंयजुर्वेदइत्यर्थः॥अथसामवेदस्वरूपं॥भरद्वाजगोत्रंरुद्रोदेवत्यंजगतीछंदः॥अथर्ववेदस्यैदंजा
तिगोत्रंरुद्रोदेवत्यंअनुष्टुप्छंदः॥७॥अथ४फलमाहुतिमाह॥यदृग्भिति॥यःपुमान्दृदंवेदानांनामरूपगो
त्रप्रमाणंछंदोदैवतवर्णंवर्णयंति॥नामादीनांदृदंकवङ्गावः॥नामऋग्वेदादि॥१॥रूपंपंचपत्रादिरा
गोत्रंआत्रेयादि३प्रमाणंपंचवितस्त्यादि४छंदोगायत्र्यादि५देवतंसोमादि६वर्णश्वेतादिच७योजाना
तिसअविद्योविद्याहीनःसन्विद्यांलभतेप्राप्नोति॥अथनग्नोजातरोजातिंजायते॥हवैजातिंस्मरतिजांन्म
निजन्मनिप्रतिजन्मवेदपारगोवेदपाठीभवति॥अव्रतीव्रतहीनोपिव्रतवान्भवति॥व्रतफलमाप्नोति॥अब्र
ह्मचारीब्रह्मचारीभवतिब्रह्मचार्यहीनोपिब्रह्मचार्यफलंप्राप्नोतीत्यर्थः॥शौनकाचार्यनमः॥परावृत्तिःग्रंथस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माह्यर्थः॥श्रवणफलमाह॥यइदमिति॥यःपुमान्इदंचरव्रतंगर्भिणी स्त्रियंश्रावयेत्सास्त्रीपुमांसंपुरुषलक्षणो
पेतंपुत्रंजनयेत्॥यइदंश्राद्धकालेपठेत्॥श्राद्धंपितॄन्प्रीणाति॥तर्पयतीत्यर्थः॥यइदंचरणव्रतंप्रत्यहंपठन्सपं
त्नीकावनोभवति॥यस्यांद्विजःपंक्तावासीतांसर्वांपुनातीत्यर्थः॥सचपुत्रान्प्रभूतान्पुत्रादिकान्लभतेसचपुनःमस
प्तान्आद्यादीन्पितॄंश्च आत्मानंचैवपंचदशपुरुषान्तारयति॥यइ०॥नित्यशःपर्वसुअष्टमीव्रतइदंपूर्ण
मासीसंक्रांतिषुवापठतिसइहपापंभक्षयतोदुरीकृतोपापोपपत्तेनतएवशुचिःपवित्रःसन्ब्रह्मलोकंयाति॥ब्रह्मभा
वायगच्छतिकल्पेनेतिचेतिचतुर्थीभावंप्राप्नोतीत्यर्थः॥४॥इतिश्चरणव्रतंचतुर्थःखंडः॥त्रिरसांगधराक्षितेर्गते
र्वैभवुमासेइहाभीतिथौशुधीदृशे॥महिदासविधोपरोपकृत्वेचरणव्रतमिदंव्यधात्कृपा॥१॥विद्वद्भिः
प्रार्थितेनेयंमहीदासेदिजन्मना॥चरणव्रतंवृत्तिर्विहितोऽहमयाकृता॥२॥ ॥शके१७३४अंगिरानामसं
वत्सरेवैशाखशुक्लत्रयोदश्यांपुत्रकंसमासं॥हस्ताक्षरबहिरंभटस्यसूतेविठलभटबुरंडेनलिखितं॥
॥स्वार्थंचपरार्थंच॥७॥श्रीरामचंद्रार्पणस्तु॥७॥सांबसदाशिवार्पणमस्तु॥७॥श्रीगणपतिप्रसन्न॥७॥

K K S U LIBRARY
RAMTEK
441 106
M-1908
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.10.20 12:27
,TRANSFERRED=2020/10/20 at 12:32:34
,PAGES=47
,TYPE=STD
,NAME=S0004217
,Book Name=M-1908-CHARANVYUH TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection